दिनाङ्क:-26.01.2026

प्रात: - 06:55

<u>गणतन्त्रदिवस</u>

देशः अद्य स्वस्य सप्तसप्ततितमं गणतन्त्रदिवसम् उत्साहेन आचरति। राष्ट्रपतिः द्रौपदी मुर्मु: नवदिल्लीस्थे कर्तव्यपथे आयोजिते उत्सवे राष्ट्रं अग्रे प्रेरयति। गणतन्त्रदिवसस्य पथसंचलनम् प्रातः सार्धदश वादनात् आरभ्य प्रायः नवति निमेषपर्यन्तं प्रवर्तिष्यते। अस्य वर्षस्य मुख्य- विषयः 'स्वातन्त्र्यस्य मन्त्र: वन्दे मातरम्' तथा 'समृद्धेः मन्त्र: आत्मनिर्भर-भारतम् इति। गणतन्त्रदिवसस्य पथसंचलनम् प्रधानमन्त्री नरेन्द्र मोदी महोदयेन राष्ट्रीय-युद्ध-स्मारके पुष्पांजलिः अर्पणेन आरभ्यते।

ततः राष्ट्रपतिः द्रौपदी मुर्मु: महोदया कर्तव्य पथि आगमिष्यति, यत्र तस्याः औपचारिकपथसंचलनस्य समये अभिवादनम् प्रदास्यते। अस्मिन् औपचारिकपथसंचलने सशस्त्रसेनाः, अर्धसैन्यबलः, सहायकनागरिकबलः, एनसीसी तथा एनएसएस दलानि भागं ग्रहीष्यन्ति।

<u>दिल्ली/ सुचारुआयोजनार्थं</u>

दिल्ली आरक्षकाः गणतन्त्रदिवसस्य तथा अन्येषां सम्बन्धितसांस्कृतिककार्यक्रमाणां सुचारुआयोजनार्थं विस्तृतां यातायातपरामर्शसूचनाम् अयच्छत्। गणतन्त्रदिवसपथसंचलनम् स्वपरम्परागतमार्गेण विजयचौक् तःआरभ्य लालकिलापर्यन्तं गमिष्यति। यातायातव्यवस्था सम्यक् भवेत् इति हेतोः विशेष-प्रबन्धाः क्रियन्ते।

यात्रार्थिनः स्वयात्रां पूर्वमेव नियोजयन्तु, तथा प्रतिबन्धितसमयेषु मध्यदिल्लीक्षेत्रं न गन्तव्यम्। निवासिनां कृते मार्गप्रतिबन्धक्षेत्राणि तथा वैकल्पिकमार्गाः अपि सूचिताः।

यातायातप्रतिबन्धाः ह्यः रात्रौ एव प्रवृत्ताः, ते अद्य पथसंचलनपर्यन्तं प्रवर्तिष्यन्ते। कर्तव्यपथि पथसंचलनस्य समाप्तिपर्यन्तं यातायाताय निर्बन्धः भविष्यति। विजयचौक तः भारतद्वारपर्यन्तं गमनं अपराह्णे द्विवादनपर्यन्तं निषिद्धं भविष्यति।

अतिरिक्तं, भारतद्वारस्य समीपे स्थितः ‘सी-हेक्सागन’ प्रातः नववादनात् यातायाताय निषिद्धः भविष्यति। तिलक-मार्गे, बहादुरशाह-ज़फर-मार्गे, तथा नेताजी-सुभाष-मार्गे अपि यातायात-व्यवस्थायां परिवर्तनं भविष्यति।

अन्यच्च दिल्लीआरक्षकैः यात्रिकाः आग्रहपूर्वकंसूचिताः यत् पथसंचलनमार्गे तथा तत्समीपवर्तिक्षेत्रे अनिवार्ययात्रां परिहरन्तु।

कर्तव्यपथगमनाय, गणतन्त्रदिवसस्य समारोहं च द्रष्टुं साहाय्यं कर्तुम्, दिल्ली-मैट्रो अद्य सर्वासु रेखासु स्व-सेवाः प्रातः त्रिवादने एव अरभत।

यानानि प्रातः त्रिवादनतः प्रति पञ्चदशनिमेषेषु सञ्चलिष्यन्ति। ततः परं दिवसस्य अवशिष्ट-भागे नियमित-समय-सारिणी एव वर्तते।

दिल्ली-मैट्रो द्वारा उक्तम् यत् ते यथायोग्यं स्व-यात्रां पूर्वमेव नियोजयन्तु, तथा अन्तिमक्षणस्य असुविधां परिहर्तुं प्रातःकालिक-मैट्रो-सेवायाः उपयोगं कुर्वन्तु।

<u>पद्म-पुरस्काराः</u>

असाधारणं योगदानं कुर्वतां सामान्य-भारतीयानां उत्सवस्य सिद्धान्तम् अनुवर्तयन्, प्रशासनेन अस्य वर्षस्य अज्ञात-नायकानां पद्म-पुरस्काराः घोषिताः। अद्यावधि प्राप्तसूचनानुसारं प्रशासनं पद्मश्रीपुरस्काराय चतुःपञ्चाशत् जनानां चयनम् अकरोत्। अवधेयं यत् पद्म पुरस्कार-विजेतृणां नामानि प्रत्येकस्मिन् वर्षे गणतन्त्रदिवसस्य पूर्व सन्ध्यायां उद्घोषिताः भवन्ति।

<u>ईसी पश्चिमबङ्गालः</u>

भारतस्य निर्वाचनायोगः पश्चिमबङ्गालस्य मुख्यसचिवं निर्देशितवान् यत् बसिरहाट्–द्वयं इत्यस्य सहायक-निर्वाचन-पञ्जीकरण-अधिकारी तथा खण्ड-विकास-अधिकारी (BDO) सुमित्रा प्रतिम् प्रधान इत्येनां त्वरितप्रभावेन निलम्बयेत्, तथा निर्वाचकनामावलिसम्बद्धेभ्यः सर्वेभ्यः कार्येभ्यः तां अपसारयेत् इति।

<u>क्रिकेट</u>

भारत-न्यूजीलैंड-देशयोः मध्ये अनुवर्तमानायां विंशतिं प्रतिविंशति-क्षेपचक्रीय-क्रिकेट्-स्पर्धा-मालिकायां भारतेनं विजयं अवाप्तम्।